न श्मश्रु भक्षयेल्लोष्टान्न मृद्नीयाद्विचक्षणः ।
ज्योतींष्यमेध्यशस्तानि नाभिवीक्षेत च प्रभो ।
न हुङ्कुर्य्याच्छवं चैव शवगन्धो हि सोमजः ।
चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षञ्च वर्ज्जयेन्निशि सर्व्वदा ।
पूज्यदेवद्विजज्योतिश्छायां नातिक्रमेद्बुधः ।
नैकः शून्याटवीं गच्छेन्न च शून्यं गृहं व्रजेत् ।
केशास्थिकण्टकामेध्यबलिभस्मतुषांस्तथा ।
स्नानार्द्रां धरणीं चैव दूरतः परिवर्ज्जयेत् ।
नानार्य्यानाश्रयेत् कांश्चिन्न जिह्मं रोचयेद्बुधः ।
उपसर्पेन्न च व्यालांश्चिरं तिष्ठेन्न चोत्थितः ।
यथेष्टभोजकांश्चैव तथा देवपराङ्मुखान् ।
सर्व्वाश्रमक्रियातीतान् दूरतः परिवर्ज्जयेत् ।
अतीवजागरस्वप्नौ तद्वत् स्थानासने बुधः ।
न सेवेत तथा शय्यां व्यायामञ्च नरेश्वर ।
दंष्ट्रिणः शृङ्गिणश्चैव प्राज्ञो दूरेण वर्ज्जयेत् ।
अवश्यायञ्च राजेन्द्र पुरोवातातपौ तथा ।
न स्नायान्न स्वपेन्नग्नो न चैवोपस्पृशेद्बुधः ।
मुक्तकच्छश्च नाचामेद्देवाद्यर्च्चाञ्च वर्ज्जयेत् ।
नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे ।” * ।
किञ्च ।
“न च निर्धूनयेत् केशान्नाचामेन्नैव चोत्थितः ।
पादेन नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ।
अपसव्यं नैव गच्छेद्देवागारचतुष्पथान् ।
मङ्गल्यपूज्यांश्च तथा विपरीतान्न दक्षिणम् ।
सोमार्काग्न्यम्बुवायूनां पूज्यानाञ्च न संमुखम् ।
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गांश्च पण्डितः ।
तिष्ठन्न मूत्रयेत्तद्वत् पन्थानं नावमूत्रयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्व्वदैव न लङ्घयेत् ।
श्लेष्मष्ठीवनकोत्सर्गो नान्नकाले प्रशस्यते ।
बलिमङ्गलजप्यादौ न होमे न महाजने ।
योषितो नावमन्येत न चासां विश्वसेद्बुधः ।
न चैवेर्ष्या भवेत्तासु नाधिकुर्य्यात् कदाचन ।
मङ्गल्यपुष्परत्नाज्यपूज्याननभिवाद्य च ।
न निष्क्रामेत् गृहात् प्राज्ञः सदाचारपरो नरः ।
अकालगर्ज्जितादौ तु पर्व्वस्वाशौचकादिषु ।
अनध्यायं बुधः कुर्य्यादुपरागादिके तथा ।
वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ।
नोर्द्ध्वं न तिर्य्यक् दूरं वा निरीक्षन् पर्य्यटेद्बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ।” * ।
किञ्च ।
“प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत् ।
श्रेयस्तद्धितं वाच्यं यद्यप्यत्यन्तमप्रियम् ।
प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्म्मणा मनसा वाचा तदेव मतिमान्
भजेत् ।” * ।
बृहन्नारदीये सदाचारप्रसङ्गे ।
“असावहमिति ब्रूयाद्द्विजो वै ह्यभिवादने ।
श्राद्धं व्रतं जपं दानं देवताभ्यर्च्चनं तथा ।
यज्ञञ्च तर्पणञ्चैव कुर्व्वन्तं नाभिवादयेत् ।
तथा स्नानं प्रकुर्व्वन्तं धावन्तमशुचिन्तथा ।
भुञ्जानञ्च शयानञ्च अभ्यक्तशिरसन्तथा ।
भिक्षान्नधारिणं चैव रमन्तं जलमध्यगम् ।
कृताभिवादनो यो न कुर्य्यात् प्रत्यभिवादनम् ।
नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव सः ।” *
मार्कण्डेयपुराणे मदालसालर्कसंवादे ।
“असत्प्रलापमनृतं वाक्पारुष्यञ्च वर्ज्जयेत् ।
असच्छास्त्रमसद्वादमसत्सेवाञ्च पुत्रक ।
केशप्रसाधनादर्शदर्शनं दन्तधावनम् ।
पूर्व्वाह्न एव कार्य्याणि देवतानाञ्च तर्पणम् ।
उदक्याद्दर्शनं स्पर्शं वर्जेत् संभाषणं तथा ।
न चाभीक्ष्णं शिरःस्नानं कुर्य्यान्निष्कारणं नरः ।
शिरःस्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत् ।
पन्था देयो ब्राह्मणानां राज्ञो दुःखातुरस्य च ।
विद्याधिकस्य गुर्व्विण्या भारार्त्तस्य महीयसः ।
मूकान्धबधिराणाञ्च मत्तस्योन्मत्तकस्य च ।
पुंश्चल्याः कृतवैरस्य बालस्य पतितस्य च ।
उपानद्वस्त्रमाल्यानि धृतान्यन्यैर्न धारयेत् ।
उपवीतमलङ्कारं करकञ्चैव वर्ज्जयेत् ।
न क्षिप्तबाहुजङ्घश्च प्राज्ञस्तिष्ठेत् कदाचन ।
न चापि विक्षिपेत् पादौ वाससी न च धूनयेत् ।
मूर्खोन्मत्तव्यसनिनो विरूपान् मायिनस्तथा ।
न्यूनाङ्गानधमांश्चैव नोपहासेन दूषयेत् ।
परस्य दण्डं नोद्यच्छेत् शिक्षार्थं पुत्रशिष्ययोः ।
नानुलेपनमादद्यादस्नातः स्नातको क्वचित् ।
न चापि रक्तवासाः स्याच्चित्रवासधरोऽपि वा ।
क्षुरकर्म्माणि चान्ते च स्त्रीसम्भोगे च पुत्रक ।
स्नायीत चैलवान् प्राज्ञः कटभूमिमुपेत्य च ।
युगपज्जलमग्निञ्च बिभृयान्न विचक्षणः ।”
कटभूमिं श्मशानम् ।
“नाचचीत धयन्तीं गां जलं नाञ्जलिना
पिबेत् ।”
धयन्तीं पिबन्तीम् ।
“शौचकालेषु सर्व्वेषु गुरुष्वल्पेषु वा पुनः ।
न विलम्बेत शौचार्थं न मुखेनानलं धमेत् ।
विप्रुषो मक्षिकाद्याश्च दुष्टसङ्गाददोषिणः ।
अजाश्वौ मुखतो मेध्यौ न गोर्व्वत्सस्य चाननम् ।
मातुः प्रस्रवणे मेध्यं शकुनिः फलपातने ।
उदक्याशौचिनस्तांश्च सूतिकान्त्यावसायिनः ।
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ।
नारं स्पृष्ट्वास्थि सस्नेहं स्नातः शुध्यति मानवः ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ।
न चालपेत् जनं द्विष्टं वीरहीनां तथा स्त्रियम् ।
देवतापितृसच्छास्त्रयज्ञविप्रादिनिन्दकैः ।
कृत्वा तु स्पर्शमालापं शुध्यतेऽर्कावलोकनात् ।
अवलोक्य तथोदक्यामन्त्यजान् पतितं शठम् ।
विधर्म्मिसूतिकाषण्डविवस्त्रान्त्यावसायिनः ।
मृतनिर्यातकाश्चैव परदाररताश्च ये ।
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ।” * ।
किञ्च ।
“यच्चापि कुर्व्वतो नात्मा जुगुप्सामेति पुत्रक ।
तत् कर्त्तव्यमशङ्केन यन्न गोप्यं महाजने ।” * ।
भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे ।
“उपासते न ये पूर्व्वां द्विजाः सन्ध्यां न पश्चि-
माम् ।
सर्व्वांस्तान् धार्म्मिको राजा शूद्रकर्म्मणि योज-
येत् ।
दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टोत्सर्ज्जनं भूप सदा कार्य्यं हितैषिणा ।
उच्छिष्टो न स्पृशेच्छीर्षं सर्व्वे प्राणास्तदाश्रयाः ।
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्ज्जयेत् ।
न पाणिभ्यामुभाभ्यान्तु कण्डूयाच्चातु वै शिरः ।”
किञ्च ।
“सुवासिनीं गुर्व्विणीञ्च वृद्धं बालातुरौ तथा ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ।
अघं स केवलं भुङ्क्ते बद्धे गोवाहनादिके ।
यो भुङ्क्ते पाण्डवश्रेष्ठ प्रेक्षतामप्रदाय च ।
वर्ज्जयेद्दधि सक्तुञ्च रात्रौ धानाश्च वासरे ।”
किञ्च ।
“स्रजञ्च नापकर्षेत न बहिर्धारयीत च ।
गृहे पारावता धन्याः शुकाश्च सहकारिकाः ।”
कौर्म्मे व्यासगीतायाम् ।
“तृणं वा यदि वा शाकं मृदं वा जलमेव वा ।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते ।
न राज्ञः प्रतिगृह्णीयान्न शूद्रात् पतितादपि ।
नान्यस्माद्याचकत्वञ्च निन्दिताद्वर्ज्जयेद्बुधः ।
नित्यं याचनको न स्यात् पुनस्तन्नैव याचयेत् ।
प्राणानपहरत्येष याचकस्तस्य दुर्म्मतिः ।
न देवद्रव्यहारी स्याद्विशेषेण द्विजोत्तमाः ।
ब्रह्मस्वञ्च नापहरेदापद्यपि कदाचन ।
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
देवस्वं वापि यत्नेन सदा परिहरेत्ततः ।
न धर्म्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्व्वन् स्त्रीशूद्रदम्भनम् ।
प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभिः ।
देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः ।
ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणा-
धिकम् ।” * ।
किञ्च ।
“हिमवद्विन्ध्ययोर्मध्ये पूर्व्वपश्चिमयोः शुभम् ।
मुक्त्वा समुद्रयोर्द्देशं नान्यत्र निवसेद्द्विजः ।
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावतः ।
पुण्याश्च विश्रुता नद्यस्तत्र वा निवसेद्द्विजः ।
अर्द्धक्रोशान्नदीकूलं वर्ज्जयित्वा द्विजोत्तमाः ।”
किञ्च ।
“अग्निना भस्मना चैव सलिलेन विशेषतः ।
द्वारेण स्तम्भमार्गेण षड्भिः पङ्क्तिर्व्विभिद्यते ।
परक्षेत्रे चरन्तीं गां न चाचक्षीत कस्यचित् ।
न सूर्य्यपरिवेषं वा नेन्द्रचापं न चाग्निकम् ।
परस्मै कथयेद्विद्वान् शशिनं वा कथञ्चन ।
तिथिं पक्षस्य न ब्रूयान्नक्षत्राणि विनिर्दिशेत् ।
न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
निन्दयेद्यो गुरून् देवान् वेदं वा सोपबृंहणम् ।
कल्पकोटिशतं भग्नं रौरवे पच्यते नरः ।
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम् ।